International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(3): 61-63
© 2016 IJSR
www.anantaajournal.com
Received: 25-03-2016
Accepted: 27-04-2016

**डॉ. शालिकराम त्रिपाठी**
संस्कृताध्यापक: राजकीयोच्चतर माध्यमिकविद्यालयस्य परवेजाबाद: जसरा, इलाहाबाद

**Correspondence**
**डॉ. शालिकराम त्रिपाठी**
संस्कृताध्यापक: राजकीयोच्चतर माध्यमिकविद्यालयस्य परवेजाबाद: जसरा, इलाहाबाद

# ''वेदानां सार्थकत्वं वैज्ञानिकत्वञ्च''

## डॉ. शालिकराम त्रिपाठी

भारतीयवाङ्मये वेदानां स्थानमतीव महत्त्वपूर्णमस्ति । वेदोऽपौरुषेयोऽथवा सर्वज्ञस्य भगवतो लोकहिताय रचनेति । धर्मस्य मूलमखिलो वेद एवास्ति नास्ति कोऽपि सन्देह: । विश्वे सर्वविधस्य धर्मस्य मूलस्रोतांसि वेदा वर्तन्ते । तद्यथा-

**य: कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तित: ।**
**स सर्वोऽभिहिते वेदे सर्वज्ञानमयो हि स: ।।**[१]

सत्ता-ज्ञान-विचारण-लाभार्थेषु वर्तमानाद् विद् धातो: घञि प्रत्यये कृते सति वेद शब्द: निष्पद्यते । यथा-
(१) विद्यते वर्तते ज्ञानराशि: यस्मिन् स वेद: ।
(२) विदन्ति जानन्त्यनेन धर्ममिति वेद: ज्ञानमित्यर्थ:
(३) विन्ते विचारयति कर्त्तव्याकर्त्तव्यादिकं परमात्मानं वा योऽसौ वेद: ।
(४) विन्दन्ति प्राप्नुवन्त्यपरार्जितमप्रमेयं ज्ञानं येन स वेद: ।
उक्तस्य सर्वार्थस्य परमात्मनि एव सम्भवात् वेदा: अपौरुषेया इति मन्यन्ते । लौकिकवस्तूनां दर्शनाय यथा चक्षोरावश्यकता भवति तथैवालौकिकतत्वानां ज्ञानार्थं वेदरूपं सनातनचक्षुरावश्यकं भवति । तद्यथा-

**पितृदेवमनुष्याणां वेदश्चक्षु: सनातनम् ।**
**अगम्यं चाप्रमेयञ्च वेदशास्त्रमितिस्थिति: ।।**[२]

वैदिकसाहित्ये चत्वारो वेदा: विद्यन्ते। तत्र ऋग्वेदे १०५५२ मन्त्रा: विद्यन्ते, एतेषां लक्ष्यं मानवेभ्यो ज्ञानप्रदानमस्ति। यजुर्वेदे १९७५ मन्त्रा: उत्तमकर्मण: प्रति प्रेरयन्ति। सामवेदे १८७५ मन्त्रा: येषु ईश्वरस्मरणस्य साधनायाश्च वर्णनमस्ति। अथर्ववेदस्य ५९७७ मन्त्रा: राष्ट्रधर्म सामाजिक व्यवस्था गृहस्थ धर्माध्यात्मवाद प्रकृति वर्ण- नादीनां विस्तृतं व्यावहारिकं ज्ञानं कारयन्ति ।

**वेदेषु समानता**
वेदो मानवमात्रं हिन्दु-सिख-मुगल-ख्रिस्त-बौद्ध-जैनादिधर्माय न प्रेरयति । वेदस्तु सुस्पष्टमादिशति 'मनुर्भव' अर्थात् मनुष्यो भव इति । अद्यास्माकं मनुष्यता पाश्चात्यसंस्कृतिसंसर्गेण संक्रमितास्ति। शताधिकेषु वैदिकमन्त्रेषु भगवतो नारायणस्य विराड्रूपेण परमपुरुषरूपेण च चित्रणं वर्तते-

**सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात् ।**
**स भूमिं सर्वतस्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ।।**[३]

अस्य विश्वस्यासंख्यप्राणिनामसंख्यशिरोऽक्षि पादा: सन्ति । जगति सर्वत्र परिपूर्ण: सकलशरीरेषु प्राणिनां हृत्प्रदेशे विराजमान: स: पुरुष: निखिलं ब्रह्माण्डं सर्वतो व्यावृत्य दृश्यप्रपंचाद् बहिरपि सर्वत्र व्याप्तोऽस्ति ।
अतएव सर्वभूतमयस्येश्वरस्यावधारणां द्रढयितुमेव वेदेषु प्रार्थ्यते- ''सर्वा आशा मम मित्रं भवन्तु'' मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे' [४] समेषामस्माकमेकं जीवनलक्ष्यं भवेत् हृदयानि मनांसि च समानानि भवेयु: येन मिलित्वा तमेकं लक्ष्यं प्राप्नुम: उक्तञ्च-

**समानीव आकूतिः समाना हृदयानि वः ।**
**समानमस्तु वो मनो यथा वः सु सहासति ॥**[५]

मानवधर्मस्य एतादृशमुच्चतमं चिन्तनम् अन्यत्र दुर्लभम् । वेदाः अस्मान् शिक्षयन्ति प्रेरयन्ति च यद् वयं समाजे सुख-शान्ति-समृद्धि-सामंजस्य-सहयोग-सेवा- सत्याचरण-सदाचरण-संवेदनादिभिर्भरितहृदया भवेम ।

**वेदेषु राष्ट्रियत्वम् :-**
वेदाः न केवलं भारतीयानामपितु विश्वस्य सर्वासामपि जातीनामनुग्राहकाः पुरातनग्रन्थाः वर्तन्ते। भारतीय संस्कृतेः सभ्यतायाश्च ते प्राणभूताः वर्तन्ते। राष्ट्रप्रेम देश सेवोत्सर्गाणां प्रेरकाः वेदाः आर्याणां सर्वश्रेष्ठाः सर्वमान्याश्च ग्रन्थाः वर्तन्ते एतस्मात् कारणादेवाद्यापि वेदानां राष्ट्रव्यापिप्रचारो विद्यते वेदेषु राष्ट्रियभावनायाः यथोदात्तभावनास्ति न तथान्यत्र कुत्रापि यथा-

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।**
**देवा भागं यथा पूर्वे संजानाना उपासते ॥**[६]

धनधान्यवद्धिः पुत्रैरस्माकं राष्टं समृद्धं भवेदिति हेतोः जगदीश्वरः प्राथ्यते –

**स्वायुधं स्ववसं सुनीयं चतुः समुद्रंधरुणं रयीणाम् ।**
**चर्कृत्य शंस्यं भूरिवारमस्मभ्यं चित्रं वृषणंरयिंदाः ॥**[७]

अर्थात् हे परमैश्वर्यसम्पन्नपरमात्मन् ! अस्मभ्यं धनधान्यसम्पन्नां सन्ततिं प्रदेहि योत्तमामोघशस्त्राणि धृत्वा स्वस्य राष्ट्रस्य च रक्षां कर्तुं शक्येत, न्याय-दया-दाक्षिण्य- सदाचरणैश्च जनसमुदायस्य नेतृत्वं कुर्यात् सदैव धनधान्यादिभिः परोपकारपरायणा प्रशंसनीया लोकप्रियाद्भुतगुणसम्पन्ना सती कल्याणकारिगुणानां वृष्टिं कुर्यात्। मातृभूमिसेवायै प्रेरयन्ति वेदा :-

**'उपसर्गमातरं भूमिम्'** [८]
**नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्या।** [९]
**वयं राष्ट्रे जागृयाम पुरोहिताः** [१०]
**माता भूमिः पुत्रोऽहं पृथिव्याः ॥**[११]

कथयति च वेद- **''शतहस्त समाहर सहस्त्रहस्त संकिर'' ।**
एवं प्रकारेण वेदाः ज्ञाननिधयः तथा च विश्वस्यामूल्यनिधयः सन्ति। वेदाः अस्मान् देशरक्षायै प्रेरयन्ति । अतः आधुनिके युगेऽपि वेदानां सार्थक्यमस्तीति नास्ति सन्देहः । सर्वैर्जनैर्वेदाः अवश्यमेव पठनीयाः ।

**समस्तसंस्कृतवाङ्मयाधारो वेद :**
प्राचीनकाले भारते वेदानामध्ययनमेव भारतीयानां लक्ष्ययमासीत् । वेदाक्षर ग्रहणपूर्वकं तदर्थावबोधनं वेदाध्ययनं कथ्यते स्म। वेदाक्षराणां साधु समुच्चारणाय तदर्थावबोधनायैव शिक्षा कल्पोऽथव्याकरणं निरुक्तं छन्दो ज्यौतिषमिति षडङ्गानि प्रवृत्तानि । वेदानां सर्वतः संरक्षणार्थं वेदाङ्गानामप्यध्ययनं तदानीमनिवार्यमासीत् ।
सर्वाणि शास्त्राणि पुराणानि रामयणेतिहास-गीता-महाभारतादि धर्मग्रन्थाः यावन्तः सन्ति सर्वेषां तेषां मूलाधाराः वेदाः एव । यतोहि वेदानन्तरमेव सर्वे ग्रन्थाः विलिखिताः । तेषु या धर्मस्य व्याख्यास्ति तस्याधारो वेद एव ।
वेदा अनादयाः अपौरूषेयाः नित्याः शाश्वताः त्रैकालिकघटनानां दर्पणा अस्माकं पथप्रदर्शकास्च उपनिषदः कथयन्ति-

**''यस्य निः श्वसितं वेदाः।''**

इमे वेदाः भगवत्प्रेरणया वाल्मीकेर्मुखात प्रकटिताः यतोहि यदा धराधाम्नि भगवतः प्राकट्यं भवति तदा स भगवान् स्वयमेवावतारपृष्ठभूमिं रचयति । अगस्त्य संहितायामुक्तमस्ति –

**वेदवेद्ये परं पुंसि जाते दशरथात्मने ।**
**वेदः प्राचेतसादासीत् साक्षात् रामायणात्मना ॥**

पुराणेषु वेदार्थस्योपवृंहणम् । यथा-

**पुराण पूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः ।**[१२]
**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ॥**[१३]

पुरुषसूक्तस्य महत्वमपरिमेयमस्तीति क्षीमद्भागवते नारायणस्तुतिप्रसंगे विस्तरेण वर्णितम् । ''चत्वारिशृंगा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्ता सो अस्य ।''[१४]
अस्य मन्त्रस्य रहस्यमनेकप्रकारेणोद्घाटितं शास्त्रेषु महाभाष्ये पतञ्जलिः शब्दस्तुतिं मनुते मीमांसाशास्त्रे जैमिनिः यज्ञस्तुतिं कथयति काव्यमीमांसायां राजशेखरः काव्यपुरुषस्य स्तुतिं प्रतिपादयति । गोपथब्राह्मणेऽपि यागपरकार्थः एव स्वीकृतः स्कन्द पुराणे शिवपरकः अर्थः स्वीकृतः । यज्ञो वै विष्णुः इति प्रमाणानुरोधेन श्रीमद्भागवतीया व्याख्या अति समीचीना प्रतिभाति। आशयः खल्वेतत् यत्सर्वाणि शास्त्राणि वेदमेवानु सरन्ति ।

**वेदेषु वैज्ञानिकत्वम्**
आधुनिकभौतिकविज्ञानं ''बहुधा वदन्ति'' इति रूपेणास्मत्समक्षमस्ति परं तत् एकं सत् इत्येतत्पर्यन्तं नाध्यगात् यतोऽस्य निष्पन्तेः दार्शनिकी सामाजिकीञ्च परिणतिं सम्प्राप्तुं पाश्चात्यं मानसं नाशकत् । वैदेशिकानामेतत् भिन्नं मानसमासीत् । ''एकं सद्विप्रा बहुधां वदन्ति'' इत्येतेन सह 'कृण्वन्तो विश्वमार्यम्'' इत्यस्यापि ते द्रष्टारः आसन् । एकं सद्विप्रा बहुधा बदन्ति इति भौतिकशास्त्रस्य (फिजिक्स इत्यस्य) पराभौतिकशास्त्रम् अस्ति। ''कृण्वन्तो विश्वमार्यम्'' इति तस्य भौतिकविज्ञानस्य पूरकं सामाजिकं विज्ञानं वर्तते यत् सम्पूर्णं समाजं श्रेष्ठतमस्य विकासस्याधिकारिणं मत्वा सर्वेषां कृते एकमेतादृशं निर्वैयक्तिकं मार्गमालोकयति स वैज्ञानिकः अस्मिन् प्रसङ्गे वेदेषु विज्ञानविषयिकी चर्चापि प्रस्तूयते-
१- ऋग्वेदे समुद्रान्तृचारिणो यानस्योल्लेखः अस्ति। पूशादेवस्य नावः समुद्रान्तः अन्तरिक्षे च चलन्ति स्म । यथा-

**''यास्तेपूशन् नावो अन्तः समुद्रे**
**हिरव्ययीरन्तरिक्षे चरन्ति ॥**[१५]

२- स्वचालितविमानस्यापि ऋग्वेदे वर्णनमस्ति यथा-

**अनेनो यो मरूतो यानो असतु अनृवश्चिद् यमजत्परथीः**
**अनवसो अनभीशू रजस्तूः विरोदसी पश्यायाति साधन् ॥**[१६]

मरुतां देवानां पार्श्वे स्वचालितमेतादृशं विमानमासीत् । यस्मिन कोऽपि चालकः नाश्वाः न रश्मयः आसन् अबाधेनान्तरिक्षेऽभ्राम्यत् ।
३- पृथिव्या उत्पत्तिविषयेऽथर्ववेदे वर्णनमस्ति, यत्सा हस्तात्पतितं वस्तु इव सूर्याद् विनिर्गता यथा- ''वाहुच्युता पृथिवी द्यामिवोपरि ।[१७]
४- पृथिव्याः भ्रमणस्य कारणमेतदस्ति यत् भूगर्भीयाग्निकारणात् पृथिव्यां गतिः कम्पनं च विद्येते । याऽपसर्वं विजमाना विमश्ग्वरी यस्यामासन् अग्नयो ये अप्स्वन्तः ॥[१८]
५- वातयन्त्राणि, ऋतुयन्त्राणि दिग्यन्त्राणि, तेजो यन्त्राणि आजोयन्त्राणि च तदानीमासन्निति तैत्तिरीयोक्ति :-

**''वतानां यन्त्राय ऋतूनां यन्त्राय तेजसे यन्त्राय ओजसे यन्त्राय ।''**[१९]
६- सूर्यो नोदेति च कदाचन्नास्तमेति । स स्व स्थाने स्थितः पृथिवी तं परिक्रमति। अतएव दिनस्यान्तः सूर्यास्तः रात्रेरन्तः सूर्योदयः कथ्यते ।

यजुर्वेदे वर्णितमस्ति यत् सर्वं जगत् पारिभ्रमति । अर्थात् पृथिव्या, प्रत्येकं परमाणुः सततं परिक्राम्यति । अतएव संसारः जगत् कथ्यते । चन्द्रः स्वयं न प्रकाशते सः सूर्यादेव प्रकाशं लब्ध्वा प्रकाशते । इति मुनिर्यास्कः-

> **"अथास्प्यस्यैको रश्मिचन्द्रमसं प्रतिदीव्यति आदित्यतोऽस्म दीप्तिर्भवति ।"**[२०]

इत्येवं प्रकारेण वक्तुं शक्यते यत् यत्किमपि भौतिकं पारलौकिकं वा ज्ञानमस्ति तत्सर्वं वेदेष्वेव निगदितमस्ति । ततः एव संगृह्य पाश्चात्याः विद्वांसः किमपि संग्रह्य वैज्ञानिकेषु क्षेत्रेषु श्रेष्ठाः सञ्जाताः सन्ति । वेदाः अस्मिन् युगे धार्मिक-सामाजिक-राजनैतिक-वैज्ञानिक-वैश्विक दृष्ट्या च सर्वथा सार्थकाः प्रासंगिकाश्च सन्ति ।

**सन्दर्भ-सूची**


१- मनुस्मृतिः- २/७
२- मनुस्मृतिः- १२/९४
३- ऋग्वेदः- १०-९०-१
४- यजुर्वेदः- ३६-१८
५- ऋग्वेदः- १०-१९१-४
६- ऋग्वेदः- १०-१९१-४
७- ऋग्वेदः- १०-४७-२
९- यजुर्वेदः- ९-२२
१०- यजुर्वेदः- ९-२३
११- अथर्ववेदः- १२-१-१२
१२- महाभारतम्- आदिपर्व १-८६
१३- महाभारतम्- आदिपर्व १-२६७-२६८
१४- ऋग्वेदः- ४-५८-३
१५- ऋग्वेदः- ०६-५८
१६- ऋग्वेदः- ६-६६-७
१७- अथर्ववेदः- १८-३-२५-३५
१८- अथर्ववेद- १२-१-३७
१९- तैत्तिरीय संहिता १-६-१-२
२०- निरुक्तम्-२-६